Roll No. ........................

Total No. of Pages : 4

Total No. of Questions : 4

# उत्तरमध्यमा द्वितीयखण्ड

## विषय कोड : 825

## साहित्यम्

## पञ्चम् प्रश्नपत्रम्

**समय : 3 घण्टे** **पूर्णांक : 100**

**सूचना : सर्वे** प्रश्नाः समाधेयाः ।

### खण्ड 'अ'

### (वस्तुनिष्ठ प्रश्नाः)

25×1=25

1. अधोलिखित प्रश्नानाम् उत्तराणि लेख्यानि ।

   (*i*) वृत्तरत्नाकरस्य प्रथमेऽध्याये कति श्लोकाः सन्ति ?

   (*ii*) गणाः कति भवन्ति ?

   (*iii*) त्रिलो गणः कः ?

   (*iv*) विसर्गान्तो वर्णः दीर्घः कथ्यते ह्रस्वः वा ?

   (*v*) यतिलक्षणं किम् ?

   (*vi*) समवृत्तस्य एकस्य कस्यचित् छन्दसः नाम लिखत ।

   (*vii*) आर्याछन्दः वर्णिकछन्दोभेदः मात्रिक छन्दोभेदः वा ?

   (*viii*) विषमवृत्तं किं भवति ?

(*ix*) अनुष्टुब्वृत्ते प्रतिपादं कतिवर्णाः भवन्ति ?

(*x*) वृत्तरत्नाकरस्य द्वितीयाध्यायस्य किं नाम अस्ति ?

(*xi*) समवृत्तानां छन्दसां वर्णनं वृत्तरत्नाकरस्य कस्मिन् अध्याये अस्ति ?

(*xii*) समानिकालक्षणं किम् ?

(*xiii*) इन्द्रवज्राछन्दसि प्रतिपादं कतिवर्णाः भवन्ति ?

(*xiv*) द्रुतविलम्बितछन्दसि प्रतिपादं कतिवर्णाः भवन्ति ?

(*xv*) रगणचतुष्टययुक्तं किं वृत्तम् भवति ?

(*xvi*) वृकोदरः किरातार्जुनीयम द्वितीयसर्गे प्रारम्भे कं ब्रूते ?

(*xvii*) 'चतस्रः विद्याः' इत्यस्य कोऽर्थः ?

(*xviii*) 'कृतपञ्चाङ्गनिर्णयः' इति विशेषणं कस्य पदस्य कृते प्रयुक्तम् ?

(*xix*) 'मृगाधिपः' पदस्य कोऽर्थः ?

(*xx*) अभिमानधनस्य परमेप्सितं किम् ?

(*xxi*) 'द्विरद' पदस्य कोऽर्थः ?

(*xxii*) 'अर्थगौरवम्' कस्य कवेः प्रसिद्धम् ?

(*xxiii*) सहसा कां न विदधीत ?

(*xxiv*) वपुः किम् भूषयति ?

(*xxv*) 'विवस्वान्' इति पदस्य कोऽर्थः भवति ?

## खण्डः ब

2. अधोलिखितानाम् उत्तराणि लिखत – 15×2=30

(i) कैः दशभिः अक्षरैः समस्तं वाङ्मयं व्याप्तम् ? तेषां नामानि लिखत ।

(ii) त्रिलो गणः क ?

(iii) मात्रिकवृत्तेषु कति गणाः भवन्ति ? तेषु च कति मात्राः भवन्ति ?

(iv) वृत्ते सानुस्वाराः विसर्गान्ताः दीर्घाः युक्तपरश्च वर्णाः ह्रस्वाः भवन्ति अथवा गुरवः ?

(v) दीर्घभिन्नाः वर्णाः वृत्ते केन नाम्ना व्यवह्रियन्ते ?

(vi) पादस्य लक्षणं किम् ?

(vii) विषमवृत्तस्य किं लक्षणं भवति ?

(viii) आर्यायाः भेदानां नामानि लिखत ।

(ix) प्रमाणिकायाः लक्षणं लिखत ।

(x) उपेन्द्रवज्रायाः किं लक्षणम् ?

(xi) किरातार्जुनीयद्वितीयसर्गस्य अभिमानधनस्य गत्वरैरसुभिः' इत्यादिपद्यं पूरयत ।

(xii) किरातार्जुनीयमहाकाव्ये द्वितीयेसर्गे आगताम् प्रकृतिः खलुसा महीयसः' इत्यादि सूक्तिं लिखत।

(xiii) 'सहसा विदधीत न क्रिया' मित्यादिपद्यं सम्पूर्णं लिखत ।

(xiv) किरातार्जुनीय द्वितीयसर्गस्य समाप्तौ कौ द्वौ वर्णितौ ?

(xv) किरातार्जुनीयमहाकाव्यस्य द्वितीयसर्गस्य एकस्मिन पद्ये लघु-गुरु चिह्न प्रदर्शनं कुरुत ।

## खण्डः स

3. अधोलिखितानां भावः लेख्यः – 7×5=35

(i) पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः ।
पुरःस्थितेन तेन स्याल्लघुताऽपि क्वचिद् गुरोः ॥

(ii) प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत् ।
द्वितीयस्तुर्यवद् वृत्तं तदर्धसममुच्यते ॥

(iii) लक्ष्मैतत्सप्त गणा गोपेता भवति नेह विषमेजः ।
षष्णेऽयं नतघू वा प्रथमेऽर्द्धे नियतमार्यायाः ॥

(iv) स्यादिन्द्रवज्रा यदि तौ जगौगः ।

(v) जतौ तु वंशस्थमुदीरितं जरौ ।

(vi) इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती ।
ननु वक्तृविशेषनिः स्पृहा गुणगृह्या वचने विपश्चितः ॥

(vii) शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलङ् क्रिया ।
प्रशमाभरणं पराक्रमः स नयापादित सिद्धिभूषणः ॥

## खण्डः द

4. आर्यायाः भेदान् वर्णयत । 10

**अथवा**

किरातार्जुनीयमहाकाव्यस्य द्वितीयसर्गस्य एकस्मिन् श्लोके वृत्तविधानं प्रदर्शयत ।